author - पाणिनि:
Folios 11 incomplete

नि० २८


~~सिद्धांत~~

अष्टाध्यायी सूत्राणि

११ पत्राणि


203

ॐ नम




ॐ नमः

ॐ



आश्विन्यकेयस्मिन्दिने चंद्रमा तत्र न लेख्य: श्रेन्नो
ग्रहाश्च तस्य नक्षत्रे लेख्याः रेवत्यां यदा [illegible] मघायां



अष्टाध्यायी

श्रीगणेशाय नमः ॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ॥ कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥१॥ येन धौता गिरः पुंसां विमलैः शब्दवारिभिः । तमश्चाज्ञा
नजं भिन्नं तस्मै पाणिनये नमः ॥२॥ योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन । योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि ॥३॥ अइउण् । ऋऌक्
। एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् ॥ खफछठथचटतव् । कपय् । शषसर् । हल् । इति प्रत्याहारसूत्राणि । वृद्धिरादैच् । अदे
ङ्गुणः । इको गुणवृद्धी । न धातुलोप आर्धधातुके । क्ङिति च । दीधीवेवीटाम् । हलोऽनन्तराः संयोगः । मुखनासिकावचनोऽनुनासिकः । तुल्यास्यप्रयत्नं सवर्णम् । ना
ज्झलौ । ईदूदेद्द्विवचनं प्रगृह्यम् । अदसो मात् । शे । निपात एकाजनाङ् । ओत् । संबुद्धौ शाकल्यस्येतावनार्षे । उञः ॥ ऊँ ॥ ईदूतौ च सप्तम्यर्थे । दाधा घ्वदाप् । आद्यन्तवदे
कस्मिन् ॥१॥ तरप्तमपौ घः । बहुगणवतुडति संख्या । ष्णान्ता षट् ॥ डति च । क्तक्तवतू निष्ठा । सर्वादीनि सर्वनामानि । विभाषा दिक्समासे बहुव्रीहौ । न बहुव्रीहौ
। न बहुव्रीहौ । तृतीयासमासे । द्वन्द्वे च । विभाषा जसि । प्रथमचरमतयाल्पार्धकतिपयनेमाश्च । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्
। स्वमज्ञातिधनाख्यायाम् ॥ अन्तरं बहिर्योगोपसंव्यानयोः ॥ स्वरादिनिपातमव्ययम् । तद्धितश्चासर्वविभक्तिः । कृन्मेजन्तः । क्त्वातोसुन्कसुनः । अव्ययीभा
वश्च । शि सर्वनामस्थानम् । सुडनपुंसकस्य । न वेति विभाषा । इग्यणः संप्रसारणम् ॥ आद्यन्तौ टकितौ । मिदचोऽन्त्यात्परः । एच इग्घ्रस्वादेशे । षष्ठी स्थानेयो

गुणः। स्थानेऽन्तरतमः। उरण् रपरः। अलोऽन्त्यस्य। ङिच्च। आदेः परस्य। अनेकाल्शित्सर्वस्य। स्थानिवदादेशोऽनल्विधौ। अचः परस्मिन्पूर्वविधौ। न पदान्तद्वि
र्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। द्विर्वचनेऽचि। अदर्शनं लोपः। प्रत्ययस्य लुक्श्लुलुपः। प्रत्ययलोपे प्रत्ययलक्षणम्। न लुमताङ्गस्य
। अचोऽन्त्यादि टि। अलोऽन्त्यात्पूर्व उपधा। तस्मिन्निति निर्दिष्टे पूर्वस्य। तस्मादित्युत्तरस्य। स्वं रूपं शब्दस्याशब्दसंज्ञा। अणुदित्सवर्णस्य चाप्रत्ययः। तपरस्तत्
कालस्य। आदिरन्त्येन सहेता। येन विधिस्तदन्तस्य। वृद्धिर्यस्याचामादिस्तद्वृद्धम्। त्यदादीनि च। एङ् प्राचां देशे। [illegible] ॥
प्रथमस्याध्यायस्य प्रथमः पादः॥ गाङ्कुटादिभ्योऽञ्णिन्ङित्। विज इट्। विभाषोर्णोः। सार्वधातुकमपित्। असंयोगाल्लिट् कित्। इन्धिभवतिभ्यां च। मृडमृदगुध
कुषक्लिशवदवसः क्त्वा। रुदविदमुषग्रहिस्वपिप्रच्छः संश्च। इको झल्। हलन्ताच्च। लिङ्सिचावात्मनेपदेषु। उश्च। वा गमः। हनः सिच्। यमो गन्धने। विभाषोप
यमने। स्थाघ्वोरिच्च। न क्त्वा सेट्। निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः। मृषस्तितिक्षायाम्। उदुपधाद्भावादिकर्मणोरन्यतरस्याम्। पूङः क्त्वा च। नोपधात्थफ
न्ताद्वा। वञ्चिलुञ्च्यृतश्च। तृषिमृषिकृशेः काश्यपस्य। रलो व्युपधाद्धलादेः संश्च। ऊकालोऽज्झ्रस्वदीर्घप्लुतः। उच्चैरुदात्तः। नीचैरनुदात्तः। समाहारः स्वरितः।
तस्यादित उदात्तमर्धह्रस्वम्। एकश्रुति दूरात्सम्बुद्धौ। यज्ञकर्मण्यजपन्यूङ्खसामसु। उच्चैस्तरां वा वषट्कारः। विभाषा छन्दसि। न सुब्रह्मण्यायां स्वरितस्य तूदा

त्तः। देवब्रह्मणोरनुदात्तः। स्वरितात्संहितायामनुदात्तानाम्। उदात्तस्वरितपरस्य सन्नतरः। २। अ एकः पूर्वकालश्च प्रत्ययः। तत्पुरुषः समानाधिकरण
६ :कर्मधारयः। प्रथमानिर्दिष्टं समासउपसर्ज्जनम्। एकविभक्ति चापूर्वनिपाते। अर्थवदधातुरप्रत्ययः प्रातिपदिकम्। कृत्तद्धितसमा
साश्च। ह्रस्वो नपुंसके प्रातिपदिकस्य। गोस्त्रियोरुपसर्ज्जनस्य। लुक् तद्धितलुकि। इद्गोण्याः। लुपि युक्तवद्व्यक्तिवचने। विशेषणानां चाजातेः॥
२ ।तदशिष्यं संज्ञाप्रमाणत्वात्। लुब्योगाप्रख्यानात्। योगप्रमाणे च तदभावे दर्शनं स्यात्। प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्। का
लोपसर्ज्जने च तुल्यम्। जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम्। अस्मदो द्वयोश्च। फल्गुनीप्रोष्ठपदानां च नक्षत्रे। छन्दसि पुनर्वस्वोरे
कवचनम्। विशाखयोश्च। तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्। सरूपाणामेकशेष एकविभक्तौ। वृद्धो यूना तल्लक्षणश्चेदेव विशेषः
। स्त्री पुंवच्च। पुमान्स्त्रिया। भ्रातृपुत्रौ स्वसृदुहितृभ्याम्॥ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्। पिता मात्रा। श्वशुरः श्वश्र्वा। त्यदादीनि सर्वैर्नित्य
म्। ग्राम्यपशुसंघेष्वतरुणेषु स्त्री। गाङ्कुटाद्युदुपधादष्टक्तम्छ्रद सिद्धयो दश॥ प्रथमस्याध्यायस्य द्वितीयः पादः॥ भूवादयो धातवः। उपदेशेजनुनासिक पा॰अ
इत्। हलन्त्यम्। न विभक्तौ तुस्माः। आदिर्ञिटुडवः। षः प्रत्ययस्य। चुटू। लशक्वतद्धिते। तस्य लोपः। यथासंख्यमनुदेशः समानाम्। स्वरितेनाधिकारः। अ २

पुनर्वस्वोः

प्र क्रि स्वर त्यन्तिङ्कु विदि भ्यः २

शिद्वेर्ज्ञिज्ञासाधाम १

७ नुदात्तङित आत्मनेपदम्। भावकर्मणोः। कर्तरि कर्मव्यतिहारे। न गतिहिंसार्थेभ्यः। इतरेतरान्योन्योपपदाच्च। नेर्विशः। परिव्यवेभ्यः क्रियः। विपराभ्यां जेः।
आङो दोऽनास्यविहरणे। क्रीडोऽनुसंपरिभ्यश्च। समवप्रविभ्यः स्थः। प्रकाशनस्थेयाख्ययोश्च। उदोऽनूर्द्ध्वकर्मणि। उपान्मन्त्रकरणे। अकर्मकाच्च। उद्विभ्यां
तपः। आङो यमहनः। समो गम्यृच्छिभ्याम्। निसमुपविभ्यो ह्वः। स्पर्द्धायामाङः। गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः। अधेः
प्रसहने। वेः शब्दकर्मणः। अकर्मकाच्च। संमाननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः। कर्तृस्थे चाशरीरे कर्मणि। वृत्तिसर्गताय
१ ने षु क्रमः। उपपराभ्याम्। आङ उद्गमने। वेः पादविहरणे। प्रोपाभ्यां समर्थाभ्याम्। अनुपसर्गाद्वा। अपह्नवे ज्ञः। अकर्मकाच्च। संप्रतिभ्यामना
ध्याने। भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः। व्यक्तवाचां समुच्चारणे। अनोरकर्मकात्। विभाषा विप्रलापे। अवाद्ग्रः। समः प्रतिज्ञाने। उद
श्चरः सकर्मकात्। समस्तृतीयायुक्तात्। दाणश्च सा चेच्चतुर्थ्यर्थे। उपाद्यमः स्वकरणे। ज्ञाश्रुस्मृदृशां सनः। नानोर्ज्ञः। प्रत्याङ्भ्यां श्रुवः। शदेः शितः। ३। म्रियतेर्लुङ्लि
ङोश्च। पूर्ववत्सनः। आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य। प्रोपाभ्यां युजेरयज्ञपात्रेषु॥ समः क्ष्णुवः। भुजोऽनवने। णेरणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने। भी
स्म्योर्हेतुभये। गृधिवञ्च्योः प्रलम्भने। लियः सम्माननशालीनीकरणयोश्च॥ मिथ्योपपदात्कृञोऽभ्यासे। स्वरितञितः कर्त्रभिप्राये क्रियाफले। अपाद्वदः। णिचश्च॥

त

ढ्

।समुदाङ्भ्योयमोग्रन्थे।अनुपसर्गाज्ज्ञः॥विभाषोपपदेनप्रतीयमाने।शेषात्कर्त्तरिपरस्मैपदम्।अनुपराभ्यांकृञः।अभिप्रत्यतिभ्यःक्षिपः।८०।प्राद्वहः।परेर्मृषः
।व्याङ्परिभ्योरमः।उपाच्च।विभाषाऽकर्म्मकात्।बुधयुधनशजनेङ्प्रुद्रुस्रुभ्योणेः॥निगरणचलनार्थेभ्यश्च।अणावकर्म्मकाच्चित्तवत्कर्त्तृकात्॥नपा
दम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः।वाक्यषः।द्युद्भ्योलुङि।वृद्भ्यःस्यसनोः॥लुटिचक्लृपः।भूवादयःक्रीडोनुवेःपाद्म्रियतेःशाद्वहस्त्रयोदश
॥प्रथमस्याध्यायस्यतृतीयःपादः॥आकडारादेकासंज्ञा॥विप्रतिषेधेपरंकार्य्यम्।यूस्त्र्याख्यौनदी।नेयङुवङ्स्थानावस्त्री।वामि।ङितिह्रस्वश्च।
शेषोघ्यसखि।पतिःसमासएव।षष्ठीयुक्तश्छन्दसिवा।ह्रस्वंलघु।संयोगेगुरु।दीर्घंच।यस्मात्प्रत्ययविधिस्तदादिप्रत्ययेऽङ्गम्।सुप्तिङन्तंपदम्।नःक्ये।सि
तिच।स्वादिष्वसर्वनामस्थाने।यचिभम्।तसौमत्वर्थे।अयस्मयादीनिच्छन्दसि॥बहुषुबहुवचनम्।द्व्येकयोर्द्विवचनैकवचने॥कारके॥ध्रुवमपायेऽपादा
नम्॥भीत्रार्थानांभयहेतुः॥पराजेरसोढः।वारणार्थानामीप्सितः।अन्तर्द्धौयेनादर्शनमिच्छति।आख्यातोपयोगे।जनिकर्त्तुःप्रकृतिः।भुवःप्रभवः।कर्म्मणा
यमभिप्रैतिससंप्रदानम्।रुच्यर्थानांप्रीयमाणः॥श्लाघह्नुङ्स्थाशपांज्ञीप्स्यमानः॥धारेरुत्तमर्णः।स्पृहेरीप्सितः।क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिको राप
पः।क्रुधद्रुहोरुपसृष्टयोःकर्म्म।राधीक्ष्योर्यस्यविप्रश्नः।प्रत्याङ्भ्यांश्रुवःपूर्वस्यकर्त्ता।२।अनुप्रतिगृणश्च।साधकतममेकरणम्।दिवःकर्म्मचपरिक्र ३

या

यणे संप्रदानमन्यतरस्याम्॥ आधारोऽधिकरणम्॥ अधिशीङ्स्थासां कर्म्म। अभिनिविशश्च। उपान्वध्याङ्वसः। कर्त्तुरीप्सिततमं कर्म्म। तथायु[illegible]वि
प्र[illegible]कं चानीप्सितम्॥ ३॥ अकथितं च। गतिबुद्धिप्रत्यवसानार्थशब्दकर्म्माकर्म्मकाणामणि कर्त्ता स णौ॥
। हृक्रोरन्यतरस्याम्। स्वतन्त्रः कर्त्ता। तत्प्रयोजको हेतुश्च। प्राग्रीश्वरान्निपाताः। चादयोऽसत्वे। प्रादयः। उपसर्गाः क्रियायोगे। गतिश्च। ऊर्य्यादिच्वि
डाचश्च। अनुकरणं चानितिपरम्॥ आदरानादरयोः सदसती॥ भूषणेऽलम्॥ अन्तरपरिग्रहे। कणेमनसी श्रद्धाप्रतीघाते। पुरोऽव्ययम्। अस्तं च। अच्छग
त्यर्थवदेषु॥ अदोऽनुपदेशे। तिरोऽन्तर्द्धौ। विभाषा कृञि। उपाजेऽन्वाजे। साक्षात्प्रभृतीनि च। अनत्याधान उरसिमनसी। मध्येपदे निवचने च। नित्यं हस्ते पाणावुप
यमने। प्राध्वं बन्धने॥ जीविकोपनिषदावौपम्ये। ते प्राग्धातोः॥ ४॥ छन्दसि परेऽपि। व्यवहिताश्च। कर्म्मप्रवचनीयाः॥ अनुर्लक्षणे॥ तृतीयार्थे॥ हीने। उपोऽधि
के च॥ अपपरी वर्ज्जने। आङ्मर्य्यादावचने। लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्य्यनवः॥ अभिरभागे। प्रतिः प्रतिनिधिप्रतिदानयोः। अधिपरी अनर्थकौ॥
। सुः पूजायाम्॥ अतिरतिक्रमणे च॥ अपिः पदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु॥ अधिरीश्वरे। विभाषा कृञि। लः परस्मैपदम्। तङानावात्मनेपदम्॥ ५॥ ति
ङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः॥ तान्येकवचनद्विवचनबहुवचनान्येकशः। सुपः। विभक्तिश्च। युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः। प्र

हासेषमन्यो पपदे मन्यतेरुत्त्वम एकवद्व। अस्मद्युष्मः।शेषेप्रथमः।। परः संन्निकर्षः संहिता विरामोऽवसानम्।। आकाडाराद्व हुष्ठनुप्रतिगत्यानुर्ज्या दिकृत्त्द जि
तिडो दृश्च।। प्रथमोध्यायः समाप्तः।। ।।समर्थः पदविधिः।सुबामन्त्रिते पराङ्गवत्स्वरे।। प्राक्कडारात्समासः।सह सुपा।। अव्ययीभावः।अव्ययं विभक्तिसमी
४ पसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययोगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु।यथाऽसादृश्ये।।यावदवधारणे।।सु
श्री प्रतिनामात्रार्थे।अक्षशलाकासंख्याः परिणा।विभाषाऽपपरिबहिरञ्चवः पञ्चम्या।आङ्मर्यादाऽभिविध्योः।।लक्षणेनाभिप्रती आभिमुख्ये।अनुर्यत्समया।ये
स्यचायामः।तिष्ठद्गुप्रभृतीनि च।।पारेमध्ये षष्ठ्या वा।संख्या वंश्येन।नदीभिश्च।।अन्यपदार्थे च संज्ञायाम्।।तत्पुरुषः।।द्विगुश्च।द्वितीया श्रितातीतपतितगतात्यस्तप्राप्ता
पन्नैः।।स्वयं क्तेन।खट्वा क्षेपे।।सामि।कालाः।।अत्यन्तसंयोगे च।।तृतीया तत्कृतार्थेन गुणवचनेन।पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः।।कर्तृकरणे कृता
बहुलम्।।कृत्यैरधिकार्थवचने।।अन्नेन व्यञ्जनम्।।भक्ष्येण मिश्रीकरणम्।।चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः।।पञ्चमी भयेन।अपेतापोढमुक्तपतितापत्रस्तैरल्प उ
श्रीदोप ए शः।स्तोकान्तिकदूरार्थकृच्छ्राणि क्तेन।।सप्तमी शौण्डैः।।सिद्धशुष्कपक्वबन्धैश्च।[illegible]क्षेपे।कृत्यैर्ऋणे।संज्ञायाम्।।क्तेनाहोरात्रावयवाः।तत्र।क्षेपे।पात्रेसमितादयश्च। राम
दोपे २ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन।दिक्संख्ये संज्ञायाम्।।तद्धितार्थोत्तरपदसमाहारे च।संख्यापूर्वो द्विगुः।कुत्सितानि कुत्सनैः।।पापाण ४

केकुत्सितैः ॥ उपमानानि सामान्यवचनैः ॥ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ॥ विशेषणं विशेष्येण बहुलम् । पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्य
मवीराश्च । श्रेण्यादयः कृतादिभिः । क्तेन नञ्विशिष्टेनानञ् । सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः । वृन्दारकनागकुञ्जरैः पूज्यमानम् । कतरकतमौ जातिप
रिप्रश्ने । किं क्षेपे । पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः । प्रशंसावचनैश्च । युवा खलतिपलितवलिनजरती
भिः । कृत्यतुल्याख्या अजात्या । वर्णो वर्णेन । कुमारः श्रमणादिभिः । चतुष्पादो गर्भिण्या । मयूरव्यंसकादयश्च । समर्थस्तत्पुरुषो ध्वांक्षेणाह न्यारकेकादश्च । द्वितीयस्या
ध्यायस्य प्रथमः पादः ॥ पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे । अर्द्धं नपुंसकम् । द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् । प्राप्तापन्ने च द्वितीयया । कालाः परि
माणिना । नञ् । ईषदकृता । षष्ठी ॥ याजकादिभिश्च । न निर्धारणे । पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन । क्तेन च पूजायाम् । अधिकरणवाचिना
च । कर्मणि च । तृजकाभ्यां कर्तरि । कर्तरि च । नित्यं क्रीडाजीविकयोः । कुगतिप्रादयः । उपपदमतिङ् । अमैवाव्ययेन । तृतीयाप्रभृतीन्यन्यतरस्याम् । क्त्वा च । शेषो बहुव्रीहि
ः ॥ अनेकमन्यपदार्थे । संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये ॥ दिङ्नामान्यन्तराले । तत्र तेनेदमिति सरूपे । तेन सहेति तुल्ययोगे । चार्थे द्वन्द्वः । उपसर्जनं पूर्वम् । राज
दन्तादिषु परम् । द्वन्द्वे घि । अजाद्यदन्तम् ॥ अल्पाच्तरम् । सप्तमीविशेषणे बहुव्रीहौ । निष्ठा । वाहिताग्न्यादिषु । कडाराः कर्मधारये ॥ पूर्वापराधरत्नीयाप्रभृतीन्यष्टादश

॥ ॥द्वितीयस्याध्यायस्य द्वितीयः पादः॥ अनभिहिते। कर्म्मणि द्वितीया। तृतीया च होश्छन्दसि। अन्तरान्तरेण युक्ते। कालाध्वनोरत्यन्तसंयोगे। अपवर्गे तृतीया। सप्तमी
पञ्चम्यौ कारकमध्ये। कर्म्मप्रवचनीययुक्ते द्वितीया। यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी॥ पञ्चम्यपाङ्परिभिः। प्रतिनिधिप्रतिदाने च यस्मात्। गत्यर्थकर्म्मणि द्वि
५ तीयाचतुर्थ्यौ चेष्टायामनध्वनि। चतुर्थी संप्रदाने। क्रियार्थोपपदस्य च कर्म्मणि स्थानिनः। तुमर्थाच्च भाववचनात्। नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च। मन्यकर्म्मण्य
नादरे विभाषाप्राणिषु। कर्त्तृकरणयोस्तृतीया। सहयुक्तेऽप्रधाने। येनाङ्गविकारः॥१॥ इत्थंभूतलक्षणे। संज्ञोऽन्यतरस्यां कर्म्मणि॥ हेतौ। अकर्त्तर्यृणे पञ्चमी। वि
भाषा गुणे स्त्रियाम्। षष्ठी हेतुप्रयोगे। सर्व्वनाम्नस्तृतीया च। अपादाने पञ्चमी। अन्यारादितरर्त्ते दिक्शब्दाञ्चूत्तरपदाजाहियुक्ते॥ षष्ठ्यतसर्थप्रत्ययेन॥ एनपा द्वितीया
। पृथग्विनानानाभिस्तृतीयान्यतरस्याम्। करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य। दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्। दूरान्तिकार्थेभ्यो द्वितीया च। सप्तम्यधिक
रणे च। यस्य च भावेन भावलक्षणम्॥ षष्ठी चानादरे। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च। आयुक्तकुशलाभ्यां चासेवायाम्॥ २॥ यतश्च निर्द्धारणम्।
पञ्चमी विभक्ते। साधुनिपुणाभ्यामर्च्चायां सप्तम्यप्रतेः। प्रसितोत्सुकाभ्यां तृतीया च। नक्षत्रे च लुपि॥ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा। संबोधने च। सा राम
मन्त्रितम्। एकवचनं संबुद्धिः। षष्ठी शेषे। ज्ञोऽविदर्थस्य करणे। अधीगर्थदयेशां कर्म्मणि। कृञः प्रतियत्ने। रुजार्थानां भाववचनानामज्वरेः॥ आशिषि नाथः॥ जासिनि ५

ग

प्रहणनाटक्राथपिषां हिंसायाम्॥ व्यवहृपणोः स[illegible]मर्थयोः॥ दिव[illegible]स्तदर्थस्य॥ विभाषोपसर्गे॥ द्वितीया ब्राह्मणे॥ प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने॥ चतुर्थ्यर्थे बहुलं छन्द-
सि॥ यजेश्च करणे॥ कृ[illegible]त्वोऽर्थप्रयोगे कालेऽधिकरणे॥ [illegible] विनस्थान लोकाव्ययनिष्ठाखलर्थतृनाम्॥ अकेनोर्भविष्यदाधमर्ण्ययोः॥ कृत्यानां कर्तरि वा॥ तुल्यार्थै-
रतुलोपमाभ्यां तृतीयान्यतरस्याम्॥ चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः॥ अनभिहिते॥ कर्मणि द्वितीया॥ ... द्वितीयाध्यायस्य तृतीयः
पादः॥ द्विगुरेकवचनम्॥ द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्॥ अनुवादे चरणानाम्॥ अध्वर्युक्रतुरनपुंसकम्॥ अध्ययनतोऽविप्रकृष्टाख्यानाम्॥ जातिरप्राणिनाम्
॥ विशिष्टलिङ्गो नदीदेशोऽग्रामाः॥ क्षुद्रजन्तवः॥ येषां च विरोधः शाश्वतिकः॥ शूद्राणामनिरवसितानाम्॥ गवाश्वप्रभृतीनि च॥ विभाषा वृक्षमृगतृणधान्यव्यञ्ज-
नपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्॥ विप्रतिषिद्धं चानधिकरणवाचि॥ न दधिपयआदीनि॥ अधिकरणैतावत्त्वे च॥ विभाषा समीपे॥ स नपुंसकम्॥ अ-
व्ययीभावश्च॥ तत्पुरुषोऽनञ्कर्मधारयः॥ संज्ञायां कन्थोशीनरेषु॥ उपज्ञोपक्रमं तदाद्याचिख्यासायाम्॥ छाया बाहुल्ये॥ सभा राजामनुष्यपूर्वा॥ अशाला च॥ वि-
भाषा सेनासुराच्छायाशालानिशानाम्॥ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः॥ पूर्ववदश्ववडवौ॥ हेमन्तशिशिरावहोरात्रे च छन्दसि॥ रात्राह्नाहाः पुंसि॥ अपथं नपुंस-
कम्॥ अर्धर्चाः पुंसि च॥ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ॥ एतदस्त्रतसोस्त्रतसौ चानुदात्तौ॥ द्वितीयाटौस्स्वेनः॥ आर्धधातुके॥ अदो जग्धिर्ल्यप्ति किति॥ लुङ्सनो-

र्घस्लृ घञपोश्च। बहुलं छन्दसि॥ लिट्यन्यतरस्याम्॥ ४॥ वेञो वयिः॥ हनो वध लिङि। लुङि च॥ आत्मनेपदेष्वन्यतरस्याम्॥ इणो गा लुङि। णौ गमिरबोधने
। सनि च। इङश्च। गाङ् लिटि। विभाषा लुङ्लृङोः। णौ च संश्चङोः। अस्तेर्भूः॥ ब्रुवो वचिः। चक्षिङः ख्याञ्॥ वा लिटि। अजेर्व्यघञपोः॥ वा यौ। ण्यक्षत्रियार्षञितो यूनि
६ लुगणिञोः। पैलादिभ्यश्च। इञः प्राचाम्॥ ६॥ न तौल्वलिभ्यः। तद्राजस्य बहुषु तेनैवास्त्रियाम्। यस्कादिभ्यो गोत्रे। यञञोश्च। अत्रिभृगुकुत्सवसिष्ठगोतमा
ङ्गिरोभ्यश्च। बह्वच इञः प्राच्यभरतेषु। न गोपवनादिभ्यः। तिककितवादिभ्यो द्वन्द्वे। उपकादिभ्योऽन्यतरस्यामद्वन्द्वे। आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्। सुपो धा
तुप्रातिपदिकयोः॥ अदिप्रभृतिभ्यः शपः। बहुलं छन्दसि। यङोऽचि च। जुहोत्यादिभ्यः श्लुः। बहुलं छन्दसि। गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु। विभाषा घ्राधेट्शा
च्छासः। तनादिभ्यस्तथासोः। मन्त्रे घसह्वरणशवृदहाद्वृच्कृगमिजनिभ्यो लेः॥ ८॥ आमः। अव्ययादाप्सुपः। नाव्ययीभावादतोऽम्त्वपञ्चम्याः। तृतीयासप्तम्योर्बहुल
म्। लुटः प्रथमस्य डारौरसः। द्विगुरुपज्ञोपक्रमं वेञो वयिः न तौल्वलिभ्य आमः पंच॥ इति द्वितीयोऽध्यायः। प्रत्ययः। परश्च। आद्युदात्तश्च। अनुदात्तौ सुप्पितौ। गुप्तिज्किद्भ्यः
सन्। मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य। धातोः कर्मणः समानकर्तृकादिच्छायां वा। सुप आत्मनः क्यच्। काम्यच्च। उपमानादाचारे। कर्तुः क्यङ् सलोपश्च। भृशादिभ्यो भु
व्यच्वेर्लोपश्च हलः। लोहितादिडाज्भ्यः क्यष्। कष्टाय क्रमणे। कर्मणो रोमन्थतपोभ्यां वर्तिचरोः। बाष्पोष्माभ्यामुद्वमने। शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे। सु

खादिभ्यः कर्त्तर्वेदनायामानमो वीवष्ठेत्वङः क्यच् । पुत्रीयति । मांडवीवत्साम्मिडा ॥ मुंडमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् । धातोरेकाचो हलादेः क्रियास
मभिहारे यङ् । नित्यं कौटिल्ये गतौ । लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् ॥ सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो
णिच् । हेतुमति च । कंड्वादिभ्यो यक् । गुपूधूपविच्छिपणिपनिभ्य आयः । ऋतेरीयङ् । कमेर्णिङ् । आयादय आर्द्धधातुके वा । सनाद्यन्ता धातवः । स्यतासीलृलुटोः । सिब
हुलं लेटि । कास्प्रत्ययादाममन्त्रे लिटि । इजादेश्च गुरुमतोऽनृच्छः । दयायासश्च । उषविदजागृभ्योऽन्यतरस्याम् । भीह्रीभृहुवां श्लुवच्च । कृञ् चानुप्रयुज्यते लिटि ॥ ३ ॥ विदांकु
र्वन्त्वित्यन्यतरस्याम् । अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्निति छन्दसि । च्लि लुङि । च्लेः सिच् । शलइगुपधादनिटः क्सः । श्लिष आलिङ्
ने । नदृशः । णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ् । विभाषा धेट्श्व्योः । गुपेश्छन्दसि । नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः । अस्यतिवक्तिख्यातिभ्योऽङ् । लिपिसिचिह्वश्च । आत्मने
पदेष्वन्यतरस्याम् । पुषादिद्युताद्ऌदितः परस्मैपदेषु । सर्त्तिशास्त्यर्त्तिभ्यश्च । इरितो वा । जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च । कृमृदृरुहिभ्यश्छन्दसि । चिण्ते
पदः । ४ । दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् । अचः कर्म्मकर्त्तरि । दुहश्च । नरुधः । तपोऽनुतापे च । चिण्भावकर्म्मणोः । सार्वधातुके यक् । कर्त्तरि शप् । दिवा
दिभ्यः श्यन् । वाभ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः । यसोऽनुपसर्गात् । संयसश्च । स्वादिभ्यः श्नुः । श्रुवः शृ च । अक्षोऽन्यतरस्याम् । तनूकरणे तक्षः । तुदादिभ्यः शः । रु

धादिभ्यः श्नम्। तनादिकृञ्भ्य उः। धिन्विकृण्व्योर च।।५।। क्र्यादिभ्यः श्ना। स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्च। हलः श्नः शानज्झौ। छन्दसि शायजपि। व्यत्ययो बहुलम्। लि
ङ्याशिष्यङ्। कर्मवत्कर्मणा तुल्यक्रियः। तपस्तपःकर्मकस्यैव। न दुहस्नुनमां यक्चिणौ। कुषिरजोः प्राचां श्यन्परस्मैपदं च। धातोः। तत्रोपपदं सप्तमीस्थम्। कृदतिङ्
। वासरूपोऽस्त्रियाम्। कृत्याः। तव्यत्तव्यानीयरः।। अचो यत्। पोरदुपधात्। शकिसहोश्च। गदमदचरयमश्चानुपसर्गे। अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु
। वह्यं करणम्। अर्यः स्वामिवैश्ययोः। उपसर्या काल्या प्रजने। अजर्यं संगतम्।। वदः सुपि क्यप् च। भुवो भावे। हनस्त च। एतिस्तुशास्वृदृजुषः क्यप्। ऋदुपधाच्चाकॢपिचृते
ः। ई च खनः। भृञोऽसंज्ञायाम्।। मृजेर्विभाषा। राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः।। भिद्योद्ध्यौ नदे। पुष्यसिद्ध्यौ नक्षत्रे। विपूयविनीयजित्या मुञ्जकल्कहलिषु। प्र
त्यपिभ्यां ग्रहेः। पदास्वैरिबाह्यापक्ष्येषु च। विभाषा कृवृषोः। युग्यं च पत्रे। अमावस्यदन्यतरस्याम्। छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यख
न्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि। ऋहलोर्ण्यत्। ओरावश्यके। आसुयुवपिरपिलपित्रपिचमश्च। आनाय्योऽनित्ये। प्रणाय्योऽस
म्मतौ। पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु। क्रतौ कुण्डपाय्यसंचाय्यौ। अग्नौ परिचाय्योपचाय्यसमूह्याः। चित्याग्निचित्ये च। ण्वुल्तृचौ। नन्दिग्रहि
पचादिभ्यो ल्युणिन्यचः। इगुपधज्ञाप्रीकिरः कः। आतश्चोपसर्गे। पाघ्राध्माधेट्दृशः शः। अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च। ददातिदधात्योर्वि राम

३५

भाषाज्वलितिकसन्तेभ्यो णः ॥७॥ श्याद्व्यधास्रुसंस्रुतीणवसावहृदिहलिहश्लिषश्वसश्च ॥ दुन्योरनुपसर्गे ॥ विभाषा ग्रहः ॥ गेहे कः ॥ शिल्पिनि ष्वुन् ॥ गस्थकन् ॥ ण्युट् च ॥ ह
श्च व्रीहिकालयोः ॥ प्रुसृल्वः समभिहारे वुन् ॥ आशिषि च ॥ ३ ॥ त्सये मुपगडुविदांदीपदिभ्योऽवद्ययुगं श्याद्व्यधादश ॥ तृतीयाध्यायस्य प्रथमः पादः ॥ कर्मण्यण् ॥ ह्वावा
मश्च ॥ आतोऽनुपसर्गे कः ॥ सुपि स्थः ॥ तुन्दशोकयोः परिमृजापनुदोः ॥ प्रे दाज्ञः ॥ समि ख्यः ॥ गापोष्टक् ॥ हरतेरनुद्यमनेऽच् ॥ वयसि च ॥ आङि ताच्छील्ये ॥ अर्हः ॥ स्तम्बक
र्णयो रमिजपोः ॥ शमि धातोः संज्ञायाम् ॥ अधिकरणे शेतेः ॥ चरेष्टः ॥ भिक्षासेनादायेषु च ॥ पुरोऽग्रतोऽग्रेषु सर्त्तेः ॥ पूर्वे कर्त्तरि ॥ कृञो हेतुताच्छील्यानुलोम्येषु ॥ १ ॥ दिवा वि
भानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याज ङ्घाबाह्वहर्यत्तद्धनुररुष्षु ॥ कर्मणि भृतौ ॥ न शब्दश्लोककलहगाथावै
रचाटुसूत्रमन्त्रपदेषु ॥ स्तम्बशकृतोरिन् ॥ हरतेर्दृतिनाथयोः पशौ ॥ फलेग्रहिरात्मम्भरिश्च ॥ छन्दसि वनसनरक्षिमथाम् ॥ एजेः खश् ॥ नासिकास्तनयोर्ध्माधेटोः ॥ नाडी
मुष्ट्योश्च ॥ उदि कूले रुजिवहोः ॥ वहाभ्रे लिहः ॥ परिमाणे पचः ॥ मितनखे च ॥ विध्वरुषोस्तुदः ॥ असूर्यललाटयोर्दृशितपोः ॥ उग्रंपश्येरम्मदपाणिंधमाश्च ॥ प्रियवशे वदः
खच् ॥ द्विषत्परयोस्तापेः ॥ वाचि यमो व्रते ॥ २ ॥ पूःसर्वयोर्दारिसहोः ॥ सर्वकूलाभ्रकरीषेषु कषः ॥ मेघर्त्तिभयेषु कृञः ॥ क्षेमप्रियमद्रेऽण् च ॥ आशिते भुवः करणभावयोः ॥ संज्ञा
यां भृतॄवृजिधारिसहितपिदमः ॥ गमश्च ॥ अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः ॥ आशिषि हनः ॥ अपे क्लेशतमसोः ॥ कुमारशीर्षयोर्णिनिः ॥ लक्षणे जायापत्योष्टक्

।अमनुष्यकर्तृके च।शक्तौ हस्तिकपाटयोः।पाणिघताडघौ शिल्पिनि।आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्।कर्त्तरि भुवः खिष्णुच्खुक
ञौ।स्पृशोऽनुदके क्विन्।ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च।त्यदादिषु दृशोऽनालोचने कञ्च।३।सत्सूद्विषद्रुहदुहयुजविदभिदछिदजिनीराजामुपस
८ र्गेऽपि क्विप्।भजो ण्विः।छन्दसि सहः।वहश्च।कव्यपुरीषपुरीष्येषु ञ्युट्।हव्येऽनन्तःपादम्।जनसनखनक्रमगमो विट्।अदोऽनन्ने।क्रव्ये च।दुहः कब्घश्च।मन्त्रे श्वेतवहोक्थ
शस्पुरोडाशो ण्विन्।अवे यजः।विजुपे छन्दसि।आतो मनिन्क्वनिब्वनिपश्च।अन्येभ्योऽपि दृश्यन्ते।क्विप् च।स्थः क च।सुप्यजातौ णिनिस्ताच्छील्ये।कर्त्तर्युपमा
ने।व्रते।।४।बहुलमाभीक्ष्ण्ये।मनः।आत्ममाने खश्च।भूते।करणे यजः।कर्म्मणि हनः।ब्रह्मभ्रूणवृत्रेषु क्विप्।बहुलं छन्दसि।सुकर्म्मपापमन्त्रपुण्येषु कृञः।सोमे सु
ञः।अग्नौ चेः।कर्म्मण्यग्न्याख्यायाम्।कर्म्मणीनि विक्रियः।दृशेः क्वनिप्।राजनि युधिकृञः।सहे च।सप्तम्यां जनेर्डः।पञ्चम्यामजातौ।उपसर्गे च संज्ञायाम्।।
अनौ कर्म्मणि।५।अन्येष्वपि दृश्यते।निष्ठा।सुयजोर्ड्वनिप्।जीर्यतेरतृन्।छन्दसि लिट्।लिटः कानज्वा।क्वसुश्च।भाषायां सदवसश्रुवः।उपेयिवाननाश्वा
न्नूचानश्च।लुङ्।अनद्यतने लङ्।अभिज्ञावचने लृट्।न यदि।विभाषा साकाङ्क्षे।परोक्षे लिट्।हशश्वतोर्लङ् च।प्रश्ने चासन्नकाले।लट् स्मे।अपरोक्षे च।नन
नौ पृष्टप्रतिवचने।।६।।नन्वोर्विभाषा।पुरि लुङ् चास्मे।वर्त्तमाने लट्।लटः शतृशानचावप्रथमासमाधिकरणे।संबोधने च।लक्षणहेत्वोः क्रियायाः।तौ सत् ८

पूङ्यजोः शानन्। ताच्छील्यवयोवचनशक्तिषु चानश्। इङ्धार्योः शत्रकृच्छ्रिणि। द्विषोऽमित्रे। सुञो यज्ञसंयोगे। अर्हः प्रशंसायाम्। आक्वेस्तच्छीलतद्धर्मतत्साधु
कारिषु। तृन्। अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच्। णेश्छन्दसि। भुवश्च। ग्लाजिस्थश्च ग्स्नुः॥ त्रसिगृधिधृषिक्षिपेः क्नुः॥ ७॥ शमि
त्यष्टाभ्यो घिनुण्। संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजा
तिचरापचरामुषाभ्याहनश्च। वौ कषलसकत्थस्रम्भः। अपे च लषः। प्रे लपसृद्रुमथवदवसः। निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासू
यो वुञ्। देविक्रुशोश्चोपसर्गे॥ चलनशब्दार्थादकर्मकाद्युच्। अनुदात्तेतश्च हलादेः। जुचंक्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः। क्रुधमण्डार्थेभ्यश्च। न यः। सूददी
पदीक्षश्च। लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्। जल्पभिक्षकुट्टलुण्टवृङः षाकन्। प्रजोरिनिः। जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च। स्पृहिगृहिप
तिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्। दाधेट्सिशदसदो रुः। सृघस्यदः क्मरच्॥ ८॥ भञ्जभासमिदो घुरच्। विदिभिदिच्छिदेः कुरच्। इण्नशजिसर्तिभ्यः क्वरप्। गत्वरश्च। जागुरूकः
। यजजपदशां यङः॥ नमिकम्पिस्म्यजसकमहिंसदीपो रः। सनाशंसभिक्ष उः। विन्दुरिच्छुः। क्याच्छन्दसि। आदृगमहनजनः किकिनौ लिट् च। स्वपितृषोर्नजिङ्। शॄवन्द्योरारुः। भि
यः क्रुक्लुकनौ। स्थेशभासपिसकसो वरच्। यश्च यङः। भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्। अन्येभ्योऽपि दृश्यते। भुवः संज्ञान्तरयोः। विप्रसंभ्यो ड्वसंज्ञायाम्। ८।

१

भः कर्म्मणि ष्ट्रन्॥ दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे॥ हलसूकरयोः पुवः। अर्त्तिलूधूसूखनसहचर इत्रः। पुवः संज्ञायाम्। कर्त्तरि चर्षिदेवतयोः
। ञीतः क्तः। मतिबुद्धिपूजार्थेभ्यश्च॥ ॥ कर्म्मणि द्वितीयाः सर्व्वसत्सूवहुलमन्येषुनपुंसकोः शामितिमप्तम धः कर्म्मणापद्वो॥ तृतीयाध्यायस्य द्वितीयः पादः॥ उणादयो
२ वहुलम्॥ भूतेपि दृश्यन्ते। भविष्यति गम्यादयः। यावत्पुरानिपातयोर्ल्लट्। विभाषा कदाकर्ह्योः। किंवृत्ते लिप्सायाम्। लिप्स्यमानसिद्धौ च। लोडर्थलक्षणे च॥ लिङ्चो
र्द्ध्वमौहूर्त्तिके॥ तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्॥ भाववचनाश्च। अण्कर्म्मणि च। लृटः शेषे च। लृटः सद्वा। अनद्यतने लुट्। पदरुजविशस्पृशो घञ्। सृ स्थिरे। भावे। अ
कर्त्तरि च कारके संज्ञायाम्। परिमाणाख्यायां सर्व्वेभ्यः॥ १॥ इङश्च। उपसर्गे रुवः। समि युद्रुदुवः। श्रिणीभुवोऽनुपसर्गे। वौ क्षुश्रुवः। प्रे स्त्रोऽयज्ञे। प्रथने वावशब्दे। छन्दो
नाम्नि। उदि ग्रहः। समि मुष्टौ। परिन्योर्नीणोर्द्यूताभ्रेषयोः। परावनुपात्यय इणः। व्युपयोः शेतेः पर्याये। हस्तादाने चेरस्तेये॥ २॥ निवासचितिशरीरोपसमाधानेष्वा
देश्च कः। संघे चानौत्तराधर्य्ये। कर्म्मव्यतिहारे णच् स्त्रियाम्। अभिविधौ भाव इनुण्। आक्रोशेऽवन्योर्ग्रहः। प्रे लिप्सायाम्। परौ यज्ञे। नौ वृ धान्ये। उदि श्रयतियौति
पूद्रुवः। विभाषाऽऽङि रुप्लुवोः। अवे ग्रहो वर्षप्रतिबन्धे। प्रे वणिजाम्। रश्मौ च। वृणोतेराच्छादने। परौ भुवोऽवज्ञाने। एरच्॥ ऋदोरप्। ग्रहवृदृनिश्चिगमश्च। उपसर्गेऽदः। नौ राम
ण च॥ ३॥ व्यधजपोरनुपसर्गे। स्वनहसोर्वा। यमः समुपनिविषु च॥ नौ गदनदपठस्वनः। क्वणो वीणायां च। नित्यं पणः परिमाणे। मदोऽनुपसर्गे। प्रमदसम्मदौ हर्षे
२

समुदोरजः पशुषु । अक्षेषु ग्लहः । प्रजने सर्त्तेः । ह्वः संप्रसारणं च न्यभ्युपविषु । आङि युद्धे । निपानमाहावः । भावेऽनुपसर्गस्य । हनश्च वधः । मूर्त्तौ घनः । अन्तर्घनो देशे
। अगारैकदेशे प्रघाणः प्रघणश्च । उद्घनोऽत्याधानम् ॥ ४ ॥ अपघनोऽङ्गम् । करणेऽयोविद्रुषु । स्तंबे क च । परौ घः । उपघ्न आश्रये । संघोद्घौ गणप्रशंसयोः । निघो
निमितम् । ड्वितः क्त्रिः । ट्वितोऽथुच् । यजयाचयतविच्छप्रच्छरक्षो नङ् । स्वपो नन् । उपसर्गे घोः किः । कर्मण्यधिकरणे च । स्त्रियां क्तिन् । स्थागापापचो भावे । मं
त्रे वृषेषपचमनविदभूवीरा उदात्तः । ऊतियूतिजूतिसातिहेतिकीर्त्तयश्च । व्रजयजोर्भावे क्यप् । संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः । कृञः
श च ॥ ५ ॥ इच्छा ॥ अ प्रत्ययात् । गुरोश्च हलः । षिद्भिदादिभ्योऽङ् । चिंतिपूजिकथिकुंबिचर्चश्च । आतश्चोपसर्गे । ण्यासश्रंथो युच् । रोगाख्यायां ण्वुल् बहुलम् । संज्ञायाम्
। विभाषाख्यानपरिप्रश्नयोरिञ्च । पर्यायार्हर्णोत्पत्तिषु ण्वुच् । आक्रोशे नञ्यनिः । कृत्यल्युटो बहुलम् । नपुंसके भावे क्तः । ल्युट् च । कर्मणि च येन संस्पर्शात्कर्त्तुः शरी
रसुखम् । करणाधिकरणयोश्च । पुंसि संज्ञायां घः प्रायेण । गोचरसंचरवहव्रजव्यजापणनिगमाश्च । अवे तॄस्त्रोर्घञ् ॥ ६ ॥ हलश्च । अध्यायन्यायोद्यावसंहा
राश्च । उदंकोऽनुदके । जालमानायः । खनो घ च । ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् । कर्त्तृकर्मणोश्च भूकृञोः । आतो युच् । छंदसि गत्यर्थेभ्यः । अन्येभ्योऽपि दृश्यते । व
र्त्तमानसामीप्ये वर्त्तमानवद्वा । आशंसायां भूतवच्च । क्षिप्रवचने लृट् । आशंसावचने लिङ् । नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः । भविष्यति मर्यादावचनेऽवरे

10

स्मिन्च। कालविभागे वानहोरात्राणाम्। परस्मिन्विभा। लिङ्निमित्ते ल्ङ्‌॰ क्रियातिपत्तौ। भूतेव॥७॥ वोताप्योः। गर्हायां लङ्‌॰ पिजात्वोः विभाषाकथमि लिङ्‌च
। किं वृत्ते लिङ्लटौ॥ अनवक्लृप्त्यमर्षयोर किं वृत्तेपि। किं किलास्त्यर्थेषु लट्॥ जातुयदो लिङ्‌॰ यच्चयत्रयोः। गर्हायां च। चित्रीकरणे च। शेषे लड्‌यदो। उताप्योः समर्थ
अ॰ धा॰ योर्लिङ्‌। कामप्रवेदनेकच्चिति। संभावनेलमिति चेत्सिद्धाप्रयोगे। विभाषाधातौ संभावनवचनेयदि। हेतुहेतुमतोर्लिङ्‌। इच्छार्थेषु लिङ्‌॰ लोटौ। समानकर्तृके
१॰ षुतुमुन्। लिङ्‌॰ च। इच्छार्थेभ्यो विभाषावर्तमाने॥ ॥ विधिनिमंत्रणामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्‌॰। लोट्‌च। प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च। लिङ्‌॰ चोर्ध्व
मौहूर्तिके। स्मेलोट्‌। अधीष्टेच। कालसमयवेलासु तुमुन्। लिङ्‌यदि। अर्हेकृत्यतृचश्च। आवश्यकाधमर्ण्ययोर्णिनिः। कृत्याश्च। शकि लिङ्‌॰। आशिषि लिङ्लोटौ। क्तिच्क्तौ
च संज्ञायाम। माङि॰ लुङ्‌॰। स्मोत्तरे लङ्‌॰॥ ३॥ धातुसंबंधे
प्रत्ययाः। क्रियासमभिहारे लोट लोटो हिस्वौ वा च तध्वमोः॥ समुच्चये ऽन्यतरस्याम्। यथाविध्यनुप्रयोगः पूर्वस्मिन्। समुच्चये सामान्यवचनस्य। छन्दसि लुङ्‌॰
लङ्‌॰ लिटः। लिङर्थे लेट्। उपसंवादाशंकयोश्च। तुमर्थेसेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्‌॰ तवेनः। प्रयैरोहिष्यैअव्यथिष्यै। दृशे॥ राम
विख्येच। शकि णमुल्कमुलौ। ईश्वरेतोसुन्कसुनौ। कृत्यार्थेतवैकेकेन्यत्वनः। अवचक्षेच। भावलक्षणेस्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्। सृपितृदोः कसुन्। अ

इति वर्तते। हलश्च वोताप्योः विभाषा षोडश॥ तृतीयस्याध्यायस्य तृतीयः पादः॥

लंखल्वोः प्रतिषेधयोः प्राचां क्त्वा। उदीचां माङो व्यतीहारे। परावरयोगे च॥ २१॥ समानकर्तृकयोः पूर्वकाले। आभीक्ष्णे णमुल् च॥ न यद्यनाकाङ्क्षे। विभाषाग्रेप्रथमपू
र्वेषु। कर्मण्याक्रोशे कृञः खमुञ्। स्वादुमि णमुल्। अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्। यथातथयोरसूयाप्रतिवचने। कर्मणि दृशिविदोः साकल्ये। या
वति विन्दजीवोः। चर्मोदरयोः पूरेः। वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्। चेले क्नोपेः। निमूलसमूलयोः कषः॥ शुष्कचूर्णरूक्षेषु पिषः। समूलाकृतजीवेषु हन्
कृञ्ग्रहः। करणे हनः। स्नेहने पिषः। हस्ते वर्त्तिग्रहोः। स्वे पुषः। ३१ अधिकरणे बन्धः। संज्ञायाम्। कर्त्रोर्जीवपुरुषयोर्नशिवहोः। ऊर्ध्वे शुषिपूरोः। उपमाने कर्म
णि च। कषादिषु यथाविध्यनुप्रयोगः। उपदंशस्तृतीयायाम्। हिंसार्थानां च समानकर्मकाणाम्॥ सप्तम्यां चोपपीडरुधकर्षः। समासत्तौ
। प्रमाणे च। अपादाने परीप्सायाम्। द्वितीयायां च। स्वाङ्गेऽध्रुवे। परिक्लिश्यमाने च। विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः। अस्यतितृषोः क्रियान्तरे का
लेषु। नाम्न्यादिशिग्रहोः। अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ। तिर्यच्यपवर्गे। ४१। स्वाङ्गे तस्प्रत्यये कृभ्वोः। नाधार्थप्रत्यये च्व्यर्थे। तूष्णीमि भुवः। अन्वच्यानु
लोम्ये। शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन्॥ पर्याप्तिवचनेष्वलमर्थेषु। कर्त्तरि कृत्। भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा। लः
कर्मणि च भावे चाकर्मकेभ्यः। तयोरेव कृत्यक्तखलर्थाः। आदिकर्मणि क्तः कर्त्तरि च। गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च। दाशगोघ्नौ

धा

संप्रदानेऽभीमादयोपादाने। नाम्यामन्त्रोपायः। क्तोऽधिकारोचध्रौव्यगतिप्रत्यवसानार्थेभ्यः॥ लस्य॥ तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्व
मिड्वहिमहिङ् टित आत्मनेपदानां टेरे थासः से लिटस्तझयोरेशिरेच परस्मैपदानां णलतुसुस्थलथुसणल्वमाः विदो लटो वा ब्रुवः पंचानामादित आहो ब्रुवः लोटो लङ्वत्
श्रा एरुः सेर्ह्यपिच्च वा छंदसि मेर्निः आमेतः सवाभ्यांवामौ आडुत्तमस्य पिच्च एत ऐ लेटोऽडाटौ आत ऐ वैतोऽन्यत्र इतश्च लोपः परस्मैपदेषु सउत्तमस्य नित्यं ङितः इतश्च तस्थस्थ
१ ११ मिपांतांतंतामः लिङः सीयुट् यासुट् परस्मैपदेषूदात्तो ङिच्च किदाशिषि झस्य रन् इटोऽत् सुट् तिथोः झेर्जुस् सिजभ्यस्तविदिभ्यश्च आतः लङः शाकटायनस्यैव द्विषश्च।
लिङ्क्तिाङ्सार्वधातुकम् आर्द्धधातुकं शेषः लिट् च लिङाशिषि छंदस्युभयथा ॥ तृतीयाध्यायस्य चतुर्थः पादः ॥ तृतीयाध्यायः समाप्तः ॥ ड्याप्प्रातिपदिकात् स्वौ